श्रीकृष्णस्तोत्रं ब्रह्मवैवर्तपुराणे धर्मकृतम्

{॥ श्रीकृष्णस्तोत्रं ब्रह्मवैवर्तपुराणे धर्मकृतम् ॥}

श्रीधर्म उवाच ।

कृष्णं विष्णुं वासुदेवं परमात्मानमीश्वरम् ।

गोविन्दं पर्मानन्दमेकमक्षरमच्युतम् ॥ १॥

गोपेश्वरं च गोपीशं गोपं गोरक्षकं विभुम् ।

गवामीशं च गोष्ठस्थं गोवत्सपुच्छधारिण्म् ॥ २॥

गोगोपगोपीमध्यस्थं प्रधानं पुरुषोत्तमम् ।

वन्देऽनवद्धमनघं श्यामं शान्तं मनोहरम् ॥ ३॥

इत्युच्चार्य समुत्तिष्ठन् रत्नसिंहासने वरे ।

ब्रह्मविष्णुमहेशांस्तान्संभाष्य स उवास ह ॥ ४॥

चतुर्विंशतिनामानि धर्मवक्त्रोद्गतानि च ।

यः पठेत्प्रातरुत्थाय स सुखी सर्वतो जयी ॥ ५॥

मृत्युकाले हरेर्नाम तस्य साध्यं भवेद्ध्रुवम् ।

स यात्यन्ते हरेः स्थानं हरिदास्यं भवेद्ध्रुवम् ॥ ६॥

नित्यं धर्मस्तं घटते नाधर्मे तद्रतिर्भवेत् ।

चतुर्वर्गफलं तस्य शश्वत्करगतं भवेत् ॥ ७॥

तं दृष्ट्वा सर्वपापानि पलायन्ते भयेन च ।

भयानि चैव दुःखानि वैनतेयमिवोरेगाः ॥ ८॥

इति ब्रह्मावैवर्ते धर्मकृतं श्रीकृष्णस्तोत्रम् ।

brahmavaivartapurANa brahmakhaNDam adhyAya 3 shloka 45-52

Encoded and proofread by Dinesh Agarwal dinesh.garghouse at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Krishna Stotram (By Dharma) Lyrics in Devanagari PDF
% File name : krishnastotradharmaBVP.itx
% Location : doc_vishhnu
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Dinesh Agarwal dinesh.garghouse at gmail.com
% Proofread by : Dinesh Agarwal dinesh.garghouse at gmail.com
% Description-comments : brahmavaivartapurANa brahmakhaNDam adhyAya 3 shloka 45-52
% Latest update : January 19, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study

% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website